च्छान्तिकं दोषपरिहारार्थं विधेयम् परन्त्वत्र देवताभेद एव केवलं ध्येयः। स च तत्तत्स्वामिकृतः तत्तन्मन्त्राश्च वेदादेवावगन्तव्यास्तच्छान्तिकञ्च तिथिगण्डान्तशान्तावस्माभिर्वक्ष्यत इत्यलमतिप्रसङ्गेन" पी॰धा॰। अथ मूलनिवासं सफलमिन्द्रवज्राच्छन्दसाह स्वर्गे इति शुचिराषाढः प्रौष्ठपदो भाद्रपदः इष आश्विनः माघः प्रसिद्धः एषु मासेषु मूलं मूलनक्षत्रं स्वर्गेऽस्ति स्वर्गे निवासस्तस्य। नभाः श्रावणः अन्ये प्रसिद्धाः श्रावणकार्त्तिकचैत्रपौषेषु भूमौ मूलं तिष्ठति। तपस्यः फाल्गुनः शुक्रो ज्येष्ठः अन्यौ प्रसिद्धौ फाल्गुनमार्गशीर्षवैशाखज्यैष्ठेष्वधस्तात्पाताले मूलं तिष्ठति एष मूलनिवास उक्तः एतत्फलञ्च मूलनक्षत्रं यदा यस्मिन्मासे यत्र वसति तत्रैव स्वर्गभूमिपातालेष्वेवोक्ताशुभाशुभफलं ददाति अयमत्र तात्पर्य्यार्थः द्रव्याद्यभावेन शान्तिकं कर्त्तुमशक्नुवतः पुंसः स्वर्गपातालनिवासित्वेन मूलस्यारिष्टदोषस्तथा न प्रभवेत् यदा तु भूमावेव निवासस्तदा दोषनिवारणं नैव स्यादित्यशक्तेनापि शान्तिकं विधेयं नैतावता प्रागुक्ते विषये शान्त्यभाव एव किन्तु यथाशक्ति तत्रापि शान्तिकं विधेयं शक्तेन तु सर्वत्रैव विधेयम् तदुक्तं ज्योतिषार्णवे "मार्गफाल्गुनवैशाखज्यैष्ठे मूलं रसातले। माघाश्विननभस्येषु शुचौ मूलं सुरालये। पौषश्रावणचैत्रेषु कार्त्तिके भूमिसंस्थितम्। भूमिष्ठं दोषबहुलं स्वल्पमन्यत्र संश्रितम्" क्वचित् सौरमासपरत्वेन मूलनिवासोऽभिहितः "वृषालिसिंहेषु घटे च मूलं दिविस्थितं युग्मतुलाङ्गनान्त्ये। पातालगं मेषधनुःकुलीरनक्रेषु भूमाविति संस्मरन्ति। स्वर्गे मूले भवेद्राज्यं पाताले च धनागमः। मर्त्यलोके यदा मूलं तदा शून्यं समादिशेदिति" ज्योतिषरत्नेऽभिहितत्वात्" पी॰धा॰। अथ मूलप्रसङ्गाद्दुष्टेषु गण्डान्तादिनिमित्तेषु सत्सु जातस्यारिष्टं सपरिहारं शार्दूलविक्रीडितेनाह गण्डान्तेति एतेषु पदार्थेषु सत्सु जनिः शिशोरुत्पत्तिर्न शस्ता दुष्टफलदा गण्डान्तः सन्धिविशेषः स त्रिविधो नक्षत्रतिथिलग्नभेदेन तल्लक्षणं ज्येष्ठा पौष्णाभेत्यादिना वक्ष्यति इन्द्रभं ज्येष्ठानक्षत्रं शूलः शूलाख्यो दुष्टयोगः पातो महापातो गणितसाध्यो, व्यतीपाताख्यो वैधृताख्यश्च परिघव्याघातगण्डा अपि दुष्टयोगाः अवमस्तिथिक्षयः संक्रान्तिः सूर्य्यस्य राश्यन्तरसंक्रमपुण्यकालः व्यतीपातवैधृतौ सप्तदशसप्तविंशतितमौ दुष्टयोगौ सिनीवाली दृष्टेन्दुरमावास्या। कुहूर्नष्टेन्दुरमावास्या "सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः" इत्यभिधानात् दर्शश्चन्द्रदर्शनरहितामावास्या एतच्चाग्रे सम्यक् प्रतिपादयिष्यते वज्रे दुष्टयोगे कृष्णे कृष्णपक्षे चतुर्दशी बहुवचनमाद्यर्थमभिप्रायं यमघण्टे मघाविशाखेत्युक्ते दुष्टयोगे दग्धयोगे सूर्य्येशपञ्चाग्निरसाष्टनन्दा इत्युक्ते दुष्टयोगे केचित्तु चापान्त्यगे गोघटगे पतङ्ग" इति वक्ष्यमाणे दुष्टयोग इति व्याचख्युः मृतौ द्वीशात्तोयादित्यादिनोक्ते मृत्युयोगे विष्टौ भद्रायां सोदरस्य भ्रातुर्भगिन्या वा भे नक्षत्रे पितृभे माता च पिता च पितरौ तयोर्भे मातृभे पितृभे च एषु निमित्तेषु सुतस्य सुताया जन्म चेत् स्यात्तदनिष्टकृत् स्यादित्यर्थः। दुष्टनिमित्तस्योपलक्षणत्वात् सूर्य्यचन्द्रग्रहणजन्मत्रीतरजन्माप्यनिष्टं सजातीयापत्यत्रयप्रसवानन्तरं विजातीयापत्यप्रसवस्त्रीतरः तथा पुत्रत्रयप्रसवानन्तरं कन्याया जननं कन्यात्रयप्रसवानन्तरं पुत्रस्य जननम् अतएव त्रिभ्यः सजातीयेभ्यः इतरो विजातीयस्त्रीतरः स्त्री च त्रीतरेति व्युत्पत्तिश्च त्रीतरश्च त्रीतरा च त्रीतरौ पुमान् स्त्रियेत्येकशेषः अथ परिहारोऽप्युच्यते सा जनिः शान्तितो वसिष्ठाद्यर्षिप्रोक्तायाः शान्त्याः शुभा परिणामे सुखदायिनी शारीरक्लेशानुभवपूर्वकनीरोगदीर्घायुष्टं शिशोः स्यादित्यर्थः। अत्र मूलवाक्यानि लिख्यन्ते। तत्र प्राक्पद्यप्रतिज्ञातसकलशान्तिसामान्यकर्मौपयिकी च मूलशान्तिस्तावदुच्यते। शौनक उवाच। अथातः सम्प्रवक्ष्यामि मूलजातहिताय च। मातापित्रोर्धनस्यापि कुले शान्तिहिताय च। त्यागो वा मूलजातस्य स्यादष्टाब्दात् प्रदर्शनम्। अभुक्तमूलजातानां परित्यागो विधीयते। अदर्शने वापि पिता स तु तिष्ठेत् समाष्टकम्। एवं च दुहितुर्ज्ञेयं मूलजातफलं बुधैः। मुख्यकालं प्रवक्ष्यामि शान्तिहोमस्य यत्नतः। जातस्य जननाहे तु जन्मर्क्षे वा शुभे दिने। समाष्टके वा मतिमान् कुर्य्याद्वै शान्तिमादरात्। यदेव शान्तिकं कुर्य्यात् कर्म तत्तु प्रचक्ष्महे" अधिकं तत्र दृश्यम्।

"गण्डेषु स्फुटरचनाब्जपत्रवल्ली" "गण्डोज्ज्वलासुज्ज्वलनाभिचक्रया" इति च माघः।

**गण्डक** पुंस्त्री गण्ड+स्वार्थे क। (गाण्डार) १पशुभेदे स्त्रियां जातित्वात् ङीष्। २गण्डशब्दार्थे तस्य हयभूषणपरत्वेऽपि क्वचित् भूषणमात्रपरतेत्यभिप्रायेण "व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा (बालग्रीवा) च" काद॰। ३ग्रन्थौ